# jIvanmukti gItA

# जीवन्मुक्ति गीता

## Document Information

Text title : jivanamuktigItA

File name : jivanmuktigiitaa.itx

Category : gItA, giitaa, dattAtreyAnandanAtha, Natha-Sampradaya

Location : doc_giitaa

Author : Dattatreya / Natha Sampradaya

Transliterated by : Sovarel Vlad vlad.sovarel at yahoo.com

Proofread by : Sovarel Vlad vlad.sovarel at yahoo.com

Latest update : May 20, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 25, 2025

*sanskritdocuments.org*

# जीवन्मुक्ति गीता

असतो मा सद्गमय ।
तमसो मा ज्योतिर्गमय ।
मृत्योर्मा अमृतंगमय ॥

सर्वभूतान्तरस्थ्याय नित्यमुक्तचिदात्मने ।
प्रत्यक्चैतन्यरूपाय मह्यमेव नमो नमः ॥

सर्वभूतानर्वर्तिने नित्यमुक्तचिद्स्वरूपिणे सर्वसाक्षिणे मह्यमेव
स्वात्मन एव नमः । नम इति द्विरुक्तिः आदरार्थम् ॥

जीवन्मुक्तिश् (मुक्तो - ख)च या मुक्तिः सा मुक्तिः पिण्डपातने ।
या मुक्तिः पिण्डपातने सा मुक्तिः शुनिशूकरे (सूकरे - क)॥ १॥

जीवन्मुक्तिरिति या मुक्तिरुच्यते सा यदि पिण्डपातन परा तर्हि
सा मुक्तिः सूकरादिष्वपि प्रसक्ता भवतीत्यर्थः ।
पिण्डपातनं न जीवन्मुक्तिरिति भावः ॥

जीवः शिवः सर्वमेव भूतेष्वेवं (भूते भूते - ख) व्यवस्थितः ।
एवमेवाभिपश्यन् हि (एवमेव पश्यति यो - ख) जीवन्मुक्तः स उच्यते ॥ २॥

जीव इति यः सः सर्वभूतेष्वपि शिवत्वेनैव व्यवस्थितः शिव एव ।
तज्ज्ञानी जीवन्मुक्त इत्यर्थः ॥

एवं ब्रह्म जगत्सर्वमखिलं भासते रविः ।
संस्थितं सर्वभूतानां जीवन्मुक्तः स उच्यते ॥ ३॥

यथा रविः सर्वं जगद्भासते एवं ब्रह्म सर्वभूतानामात्मत्वेन
संस्थितं सदखिलं भासते प्रकाश्यति । एवमेवान्हिपश्यन् इत्यनुवर्तते ।
सः तादृशः ज्ञानी जीवन्मुक्त इत्युच्यते इत्यर्थः ॥

एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।

आत्मज्ञानी तथैवैको जीवन्मुक्तः स उच्यते ॥ ४॥

जलचन्द्रवज्जले चन्द्रः यथानेकधा दृश्यते तथैव एकः आत्म ।
उपाधिभेदेन इत्यध्याहारः.... एकधा बहुधा चैव दृश्यते । एवमात्मानं
यो जानाति सः आत्मज्ञानी जीवन्मुक्त इत्युच्यते ॥

सर्वभूते स्थितं ब्रह्म भेदाभेदो न विद्यते ।
एकमेवाभिपश्यंश्च (पश्यति - ख)जीवन्मुक्तः स उच्यते ॥ ५॥

ब्रह्म सर्वभूतस्थितम् । यत्र भेदोऽभेदः भेदाभेदो न विद्यते ।
तदेकमेव । एवमभिपश्यंश्च यः स जीवन्मुक्त इत्युच्यते ॥

तत्त्वं क्षेत्रं व्योमातीतमहं क्षेत्रज्ञ उच्यते ।
अहं कर्ता च भोक्ता च (अहं कर्ता अहं भोक्ता - ख) जीवन्मुक्तः स उच्यते ॥ ६ ॥

तत्त्वस्वरूपमेवास्ति । क्षेत्रमाकाशातीतं, परमात्म क्षेत्रज्ञः ।
कर्तृत्वं भोक्तृत्वं च तस्यैव । एवं यो विजानाति सः जीवन्मुक्त उच्यते ॥

कर्मेन्द्रियपरित्यागी ध्यानवर्जितचेतसः (चेतसम् - ख)।
अत्मज्ञानी तथैवेको जीवन्मुक्तः स उच्यते ॥ ७॥

कर्मेन्द्रियपरित्यागी स्वस्वव्यापाररहितानि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि
चकुर्वन् तानि परित्यजतीत्यर्थः । तथ्हा चेतोऽपि विषयध्यानवर्जितं
करोत्येवमद्वयं जानाति यः सः जीवन्मुक्तः ॥

तत्त्वं केवलं कर्म (कर्मो - ख)शोकमोहादिवर्जितम् ।

शुभाशुभपरित्यागी जीवन्मुक्तः स उच्यते ॥ ८॥

ज्ञानिना यत्कर्म क्रियते तच्छोकमोहादिवर्जितम् । तच्च केवलं
शारीरपरिरक्षणायैव । एवं तेन शुभाशुभादिकं
परित्यक्तं भवति । स जीवन्मुक्त उच्यते ॥

कर्मसर्वत्र आदिष्टं न जानामि च किंचन ।
कर्म ब्रह्म विजानाति जीवन्मुक्तः स उच्यते ॥ ९॥

यः आदिष्टं विध्युक्तम् कर्म न जानाति कर्तृत्वारोपेण कर्मन
करोतीत्यर्थः । अत एव कर्म ब्रह्मस्वरूपमेवेति
विजानाति सः जीवन्मुक्तः ॥

चिन्मयं व्यापितं सर्वमाकाशं जगदीश्वरम् ।

सहितं (संस्थितम् - ख) सर्वभूतानां जीवन्मुक्तः स उच्यते ॥ १०॥

यः जगदीश्वरं चित्स्वरूपमित्याकाशव्यापिनमिति सर्वभूतसहितमित्यपि जानाति सः जीवन्मुक्त उच्यते ॥

अनादिवर्ति भूतानां (अनाद्य व्यक्तभूतानां - ख) जीवः शिवो न हन्यते ।
निर्वैरः सर्वभूतेषु (सर्वभूतानां - ख) जीवन्मुक्तः स उच्यते ॥ ११॥

सर्वेषु भूतेषु यः अनादिः जीवः सः शिव एव । अत एव सः न हन्यते । अतः सर्वेषु भूतेषु निर्वैरो यः जीवन्मुक्त उच्यते ॥

आत्मा गुरुस्त्वं विश्वं (गुरुस्त्वद्विश्वं) च चिदाकाशो न लिप्यते ।
गतागतं (यतागतः - ख) द्वयोर्नास्ति जीवन्मुक्तः स उच्यते ॥ १२॥

यः गुरुः आत्मा सः त्वं एव । स एव निर्लिप्तः चिदाकाशः । तद् एव सर्वम् । अत एव तस्य गतागतं गतमागतमागतं गतं वा न विद्यते । एवं यः आत्मानं सः जीवन्मुक्त इत्युच्यते ॥

गर्भ (अन्तर् - ख) ध्यानेन पश्यन्ति ज्ञानीनां मन उच्यते ।
सोऽहं मनो विलीयन्ते जीवन्मुक्तः स उच्यते ॥ १३॥

गर्भध्यानेन अन्तर्ध्यानेन इत्यर्थः । एतादृशध्यानेन ज्ञानिनः यत्पश्यन्ति तदेव ज्ञानिनां मन उच्यते । इदमेव सोऽहं मनः । एतादृशमनोविशिष्टाः ज्ञानिनः । चिदाकाश इत्यनुवर्तते । तत्र विलीयन्ते । ते तत्र विलयं यान्तीत्यर्थः । एवं स्थितस्य आत्मतत्त्वस्य ज्ञानीत्यनुवर्तते । सः जीवन्मुक्त इत्युच्यते ॥

ऊर्ध्वध्यानेन पश्यन्ति विज्ञानं मन उच्यते ।
शून्यं लयं च विलयं जीवन्मुक्तः स उच्यते ॥ १४॥

ज्ञानिनः ऊर्ध्वध्यानेन समाधिना यत्पश्यन्ति तद्विज्ञानम् । तत्तेषां मन उच्यते । तदेव शून्यं लयम् । तदेव विज्ञानम् । तथात्मज्ञान्यात्मानं जानाति यः सः जीवन्मुक्त उच्यते ॥

अभ्यासे (आभाषे - ख) रमते नित्यं मनो ध्यानलयं गतम् ।
बन्धमोक्षद्वयं नास्ति जीवन्मुक्तः स उच्यते ॥ १५॥

यस्य ज्ञानिनः मनः नित्यमभ्यासे श्रवणमनननिदिध्यासनाख्यतपसि रमते क्रीडति । यस्य मनः ध्यानलयं ध्याने लयं गतं; यस्य

बन्धमोक्षद्वन्द्वं नास्ति सः जिवन्मुक्त उच्यते ॥

एककी रमते नित्यं स्वभावगुणवर्जितम् ।
ब्रह्मज्ञानरसास्वादी (रसास्वादो - ख) जीवन्मुक्तः स उच्यते ॥ १६॥

यस्य ज्ञानिनः मनः इत्यनुवर्तते । नित्यं स्वभावगुणवर्जितं
प्रकृति गुणातीतं, सः ज्ञानी एकाकी रमते आत्मन्येव क्रीडति ।
ब्रह्मज्ञानरसास्वादी ब्रह्माख्यज्ञानरसास्वादी सः जीवन्मुक्त इत्युच्यते ॥

हृदि ध्यानेन पश्यन्ति प्रकाशं क्रियते मनः ।
सोऽहं हंसेति पश्यन्ति जीवन्मुक्तः स उच्यते ॥ १७॥

ये ज्ञानिनः हृदि ध्यानेन प्रकाशं पश्यन्ति तैः मनः क्रियते तेषां
मनोऽभिव्यक्तं भवतीति यावत् । तदा ते सोऽहं हंसः इति पश्यन्ति ।
एवमात्मतत्त्वं पश्यन् जीवन्मुक्त इत्युच्यते ॥

शिवशक्तिसमात्मानं पिण्डब्रह्माण्डम् (शिवशक्तिर्ममात्मानो पिण्डनि ब्रह्माण्डम् - ख) एव च ।
चिदाकाशं हृदं मोहं (कृतं सोऽहं - ख) जीवन्मुक्तः स उच्यते ॥ १८॥

ज्ञानिनः शिवशक्तिसमात्मानं शिवशक्तिसमः यः आत्मा तमात्मानं
महात्मानम् । पिण्डः शारीरम् । तेन सहितं ब्रह्माण्डं हृदं हृत्स्थं
बन्धकं मोहं च चिदाकाशमिति चैतन्यमेव पश्यन्ति, य
एवमात्मतत्त्वज्ञानी सः जीवन्मुक्त इत्युच्यते ॥

जाग्रत्स्वप्नसुषुप्तिं च तुरीयावस्थितं सदा ।
सोऽहं मनो विलीयेत (विलीयते - ख) जीवन्मुक्तः स उच्यते ॥ १९॥

यस्य ज्ञानिनः सोऽहं मनः सोऽहमिति ध्यानैकापरं मनः
जाग्रत्स्वप्नसुषुप्तिमतीत्य सदा तुरीयावस्थितं सच्चिदाकाशपरमात्मनि
विलीयेत सः ज्ञानी जीवन्मुक्त इत्युच्यते ॥

सोऽहं स्थितं ज्ञानमिदं सूत्रेषु मणिवत्परम् (ज्योतिरूपं निर्मलं - ख सूत्रमभित उत्तरम् - ग)।
सोऽहं ब्रह्म निराकारं जीवन्मुक्तः स उच्यते ॥ २०॥

इदं सोऽहं स्थितं ज्ञानं सूत्रेषु मणिवच्चिदाकाशे स्थितमित्यन्वयः ।
सोऽहं परं ब्रह्म निराकारम् । एवमात्मज्ञानी यः सः
जीवन्मुक्त इत्युच्यते ॥

मन एव मनुष्याणां भेदाभेदस्य कारणम् ।
विकल्पनैव संकल्पं (संकल्पो - ख) जीवन्मुक्तः स उच्यते ॥ २१॥

विकल्पना इदमित्थमेवेत्यादि तत्त्वविरुद्धा कल्पना स एव संकल्प इति प्रसिद्धः । तदेव मनोरूपं सन्मनुष्यानामहं ममेत्यादि भेदाभेदव्यवहारकारणम् । एवं यो जानाति ज्ञानफलं च संकल्पराहित्यं तथा च यः सर्वथा संकल्परहितः । सः जीवन्मुक्त इत्युच्यते ॥

मन एव विदुः प्राज्ञाः सिद्धसिद्धान्त (विदुःप्राज्ञासिद्धसिद्धान्त - ख) एव च ।
यदा (सदा - क) दृढं तदा मोक्षो (मोक्ष - ख) जीवन्मुक्तः स उच्यते ॥ २२॥

यत्प्राज्ञाः ज्ञानिनः विदुः किमिति । यदा मनः सदा दृढं भवति तदैव मोक्ष इति । स एव च सिद्धसिद्धान्तः । य एवं सिद्धान्तं वेद सः जीवन्मुक्त उच्यते ॥

योगाभ्यासी मनः श्रेष्ठोऽन्तस्त्यागी बहिर्जडः ।
अन्तस्त्यागी बहिस्त्यागी जीवन्मुक्तः स उच्यते ॥ २३॥

यो यो योगाभ्यासी योगमभ्यसति स सो मनः श्रेष्ठः मनसा श्रेष्ठः । एवं विधोऽयमन्तस्त्यागी अन्तस्थं सर्वमपि मायासंभूतं त्यजतीत्यन्तस्त्यागी । अत एव सः बहिः जडवदाचरति । एवं च सोऽन्तस्त्यागी बहिस्त्यागी च । स एव जीवन्मुक्त इत्युच्यते ॥

इति वेदान्तकेसरिणा श्रीदत्तात्रेय विरचिता जीवन्मुक्तगीता समाप्ता ॥

इति श्रीजयचामराजेन्द्रविरचिता जीवन्मुक्तगीताव्याख्या समाप्ता ॥

Encoded by Sovarel Vlad vlad.sovarel at yahoo.com

There are three sources used for the text.
Variation in them is marked in parenthesis above as footnote source with ka, kha, ga, gha marking:

क – which seems to be the oldest version, along with a sanskrit commentary by Mysore Jayacamarajendra (see the colofon);

ख – Satcakra, collection of gitas, bengali script, with some different readings and reduplication of some consonants,

ग – a edition in Bengali from Vidyaratna by Kaliprasana Bhattacarya
घ – collection of gitas, bengali script.

This text is part of a volume of “Bibliotheca Indica" Romanian review, dedicated to Rishi Dattatreya as sanskrit source for “Works of Dattatreya" foreword, introduction and translation (from Sanskrit to Romanian) by Vlad Sovarel, book published by Herald Publishing House, Bucharest, Romania.

The “sanskrit source" contains:

- Avadhuta Upanishad, attributed to Dattatreya; encoded by Vlad Sovarel
- Avadhuta Gita, attributed to Dattatreya, known also as Datta Gita; encoded by Vlad Sovarel
- Darshana Upanishad, attributed to Dattatreya; encoded by Vlad Sovarel
- Dattatreya Dhyana
- Dattatreya Stotra, attributed to Narada, from Narada Purana
- Dattatreya Tantra, attributed to Dattatreya;
- Dattatreya Upanishad, attributed to Dattatreya;
- Jivanmukti Gita, attributed to Dattatreya, along with a sanskrit commentary; encoded by Vlad Sovarel
- Tripura Rahasya, attributed to Haritayana;
- Yoga Shastra, attributed to Dattatreya; encoded by Vlad Sovarel

---

*jIvanmukti gItA*

pdf was typeset on February 25, 2025

Please send corrections to *sanskrit@cheerful.com*